श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ अष्टनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ अष्टनवतितमः सर्गः ॥

## सीतायाः कृते श्रीरामस्य शोकः, ब्रह्मणा तस्य सान्त्वनमुत्तरकाण्डशेषांशं श्रोतुं प्रेरणं च

रसातलं प्रविष्टायां वैदेह्यां सर्ववानराः।
चुक्रुशुः साधुसाध्वीति मुनयो रामसन्निधौ ॥ **7.98.1** ॥

दण्डकाष्ठमवष्टभ्य बाष्पव्याकुलितेक्षणः।
अवाक्शिरा दीनमना रामो ह्यासीत् सुदुःखितः ॥ **7.98.2** ॥

स रुदित्वा चिरं कालं बहुशो बाष्पमुत्सृजन्।
क्रोधशोकसमाविष्टो रामो वचनमब्रवीत् ॥ **7.98.3** ॥

अभूतपूर्वं शोकं मे मनः स्प्रष्टुमिवेच्छति।
पश्यतो मे यथा नष्टा सीता श्रीरिव रूपिणी ॥ **7.98.4** ॥

साऽदर्शनं पुरा सीता लङ्कां पारे महोदधेः।
ततश्चापि मयाऽऽनीता किं पुनर्वसुधातलात् ॥ **7.98.5** ॥

वसुधे देवि भवति सीता निर्यात्यतां मम।
दर्शयिष्यामि वा रोषं यथा मामवगच्छसि ॥ **7.98.6** ॥

कामं श्वश्रूर्ममैव त्वं त्वत्सकाशात् तु मैथिली।
कर्षता फालहस्तेन जनकेनोद्धृता पुरा ॥ **7.98.7** ॥

तस्मान्निर्यात्यतां सीता विवरं वा प्रयच्छ मे।
पाताले नाकपृष्ठे वा वसेयं सहितस्तया॥ **7.98.8**॥

आनय त्वं हि तां सीतां मत्तोऽहं मैथिलीकृते।
न मे दास्यसि चेत् सीतां यथारूपां महीतले॥ **7.98.9**॥

सपर्वतवनां कृत्स्नां विधमिष्यामि ते स्थितिम्।
नाशयिष्याम्यहं भूमिं सर्वमापो भवन्त्विह॥ **7.98.10**॥

एवं ब्रुवाणे काकुत्स्थे क्रोधशोकसमन्विते।
ब्रह्मा सुरगणैः सार्धमुवाच रघुनन्दनम्॥ **7.98.11**॥

राम राम न सन्तापं कर्तुमर्हसि सुव्रत।
स्मर त्वं पूर्वकं भावं मन्त्रं चामित्रकर्शन॥ **7.98.12**॥

न खलु त्वां महाबाहो स्मारयेयमनुत्तमम्।
इमं मुहूर्तं दुर्धर्ष स्मर त्वं जन्म वैष्णवम्॥ **7.98.13**॥

सीता हि विमला साध्वी तव पूर्वपरायणा।
नागलोकं सुखं प्रायात् त्वदाश्रयतपोबलात्॥ **7.98.14**॥

स्वर्गे ते सङ्गमो भूयो भविष्यति न संशयः।
अस्यास्तु परिषन्मध्ये यद् ब्रवीमि निबोध तत्॥ **7.98.15**॥

एतदेव हि काव्यं ते काव्यानामुत्तमं श्रुतम्।
सर्वं विस्तरतो राम व्याख्यास्यति न संशयः॥ **7.98.16**॥

जन्मप्रभृति ते वीर सुखदुःखोपसेवनम्।
भविष्यदुत्तरं चेह सर्वं वाल्मीकिना कृतम्॥ **7.98.17**॥

आदिकाव्यमिदं राम त्वयि सर्वं प्रतिष्ठितम्।
नह्यन्योऽर्हति काव्यानां यशोभाग् राघवादृते ॥ **7.98.18** ॥

श्रुतं ते पूर्वमेतद्धि मया सर्वं सुरैः सह।
दिव्यमद्भुतरूपं च सत्यवाक्यमनावृतम् ॥ **7.98.19** ॥

स त्वं पुरुषशार्दूल धर्मेण सुसमाहितः।
शेषं भविष्यं काकुत्स्थ काव्यं रामायणं शृणु ॥ **7.98.20** ॥

उत्तरं नाम काव्यस्य शेषमत्र महायशः।
तच्छृणुष्व महातेज ऋषिभिः सार्धमुत्तमम् ॥ **7.98.21** ॥

न खल्वन्येन काकुत्स्थ श्रोतव्यमिदमुत्तमम्।
परमम् ऋषिणा वीर त्वयैव रघुनन्दन ॥ **7.98.22** ॥

एतावदुक्त्वा वचनं ब्रह्मा त्रिभुवनेश्वरः।
जगाम त्रिदिवं देवो देवैः सह सबान्धवैः ॥ **7.98.23** ॥

ये च तत्र महात्मान ऋषयो ब्राह्मलौकिकाः।
ब्रह्मणा समनुज्ञाता न्यवर्तन्त महौजसः ॥ **7.98.24** ॥

उत्तरं श्रोतुमनसो भविष्यं यच्च राघवे।
ततो रामः शुभां वाणी देवदेवस्य भाषिताम् ॥ **7.98.25** ॥

श्रुत्वा परमतेजस्वी वाल्मीकिमिदमब्रवीत्।
भगवञ्श्रोतुमनस ऋषयो ब्राह्मलौकिकाः ॥ **7.98.26** ॥

भविष्यदुत्तरं यन्मे श्वोभूते सम्प्रवर्तताम्।
एवं विनिश्चयं कृत्वा सम्प्रगृह्य कुशीलवौ ॥ **7.98.27** ॥

**तं जनौघं विसृज्याथ पर्णशालामुपागमत्।
तामेव शोचतः सीतां सा व्यतीता च शर्वरी॥ 7.98.28॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे अष्टनवतितमः सर्गः॥